# Sadachara Smritih

# સદાચારસ્મૃતિઃ

## Document Information

Text title : Sadacharasmritih

File name : sadAchArasmRRitiH.itx

Category : misc, advice, vAdirAja, aShTaka

Location : doc_z_misc_general

Author : vAdirAjayati

Proofread by : Lata Murali, Uma Mahesh, Revathy R.

Latest update : June 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 19, 2024

*sanskritdocuments.org*

# સદાચારસ્મૃતિઃ

બુદ્ધ્વા બ્રાહ્મે મુહૂર્તે સ્મૃતહરિરથ સઙ્કીર્ત્ય તં નૈરૃતાશાં
ગત્વા ત્યક્ત્વા પુરીષં સ્મૃતિવિહિતમૃદા ચીર્ણશૌચઃ પ્રશોધ્ય ।
દન્તાન્કાષ્ઠેન કૃત્વાઽઽચમનમથ સકૃન્મગ્ન ઉત્થાય તિથ્યા-
ધ્યુક્ત્વા મૃત્સ્નાં ત્રિભાગાં દિનકરમનુનાઽઽમન્ત્ર્ય પૂર્વેણ લિમ્પેત્ ॥ ૧॥

દેહં કક્ષાળિકે ચોદિતમનુરપરેણાંસજાનુસ્વપૃષ્ઠં
નત્વા કૃષ્ણં ગુરૂંશ્ચ સ્મૃતહરિરખિલં તીર્થમાવાહ્ય તોયે ।
મગ્નસ્ત્રિર્દ્વાદશાષ્ટાક્ષરહરિમનુભિર્વાર્યુપસ્પૃશ્ય ચાપ્યં
સૂક્તં જપ્ત્વાઽથ લિમ્પેન્મૃદમુદિતમૃતં ચેતિ સૂક્તં જપંસ્ત્રિઃ ॥ ૨॥

મગ્નઃ પુંસૂક્તમન્ત્રૈઃ શિવશિખરજલેનાભિષિચ્યાથ તીર્થં
પીત્વા સન્તર્પ્ય દેવાદ્યથ ધૃતવસનો વાર્યુપસ્પૃશ્ય પુણ્ડ્રમ્ ।
ચક્રાદીન્ધારયિત્વા શ્રુતિવિહિતપથૈઃ પૂર્વસન્ધ્યામુપાસ્ય
સ્મૃત્વાઽર્કસ્થં મુકુન્દં જપમથ વિરચય્યોદિતેઽગ્નૌ જુહોતિ ॥ ૩॥

સ્નાત્વા મધ્યાહ્નકાલે શ્રુતિપથવિદુપાસ્યાથ સન્ધ્યાં ગુરૂક્તાન્
મન્ત્રાન્જપ્ત્વા પ્રતર્પ્યાચ્યુતમથ વિહિતબ્રહ્મયજ્ઞોઽર્ચયિત્વા ।
કૃત્વોક્તં વૈશ્વદેવં સ્વજનપરિવૃતસ્તત્પ્રસાદાન્નભોજી
વિદ્યાગોષ્ઠીપ્રહૃષ્ટઃ પ્રતિદિવસમુપાસીત સાયં ચ સન્ધ્યામ્ ॥ ૪॥

ધ્યાત્વા બ્રાહ્મે મુહૂર્તે હૃદિ નૃહરિમભિષ્ટૂય શાસ્ત્રોક્તરીત્યા
સ્નાત્વા ચક્રોર્ધ્વપુણ્ડ્રાઙ્કિતતનુરિનબિમ્બસ્થનારાયણાર્ઘ્યમ્ ।
દત્વા જપ્ત્વાઽથ હુત્વા સ્વગુરુમનુજપબ્રહ્મયજ્ઞાચ્યુતાર્ચાઃ
કૃત્વા હુત્વાઽથ ભુક્ત્વા કથિતહરિકથોઽન્ત્યામુપાસીત સન્ધ્યામ્ ॥ ૫॥

કર્માદૌ કર્મમધ્યે તદુપરિ ચ હરિં પ્રેરકં સંસ્મરન્તઃ
તસ્મિંસ્તાન્યર્પયન્તઃ શ્રુતિપથવિપરીતક્રિયા વર્જયન્તઃ ।
એનં યે વાદિરાજાભિધયતિરચિતં સઙ્ગ્રહં ચિન્તયન્તઃ
કુર્યુઃ કર્માણિ તેષાં વિતરતિ સકલાભીષ્ટમિષ્ટો મુકુન્દઃ ॥ ૬॥

ઇતિ શ્રીમદ્વાદિરાજપૂજ્યચરણવિરચિતા સદાચારસ્મૃતિઃ સમ્પૂર્ણા ।

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ।

Proofread by Lata Murali, Uma Mahesh

*Sadachara Smritih*

pdf was typeset on June 19, 2024

Please send corrections to *sanskrit@cheerful.com*